29-04-2021

/ शास्त्री I

अनिवार्य प्रश्नपत्रम् ।

(साहित्य आनर्स) पारिभाषिक-शब्दाः । व्याकरणेतरछात्रेभ्यः ।

1. गतिः → 'गतिश्च।' प्रादयः क्रियायोगे गतिसञ्ज्ञाः स्युः ।

2. उपसर्गः → 'उपसर्गाः क्रियायोगे।' प्रादयः क्रियायोगे उपसर्गसञ्ज्ञाः स्युः।
प्रादयः द्वाविंशतिः सन्ति - प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उद्, अभि, प्रति, परि, उप । यथा →
उप पच्यते (उपपच्यते), अत्र 'उप' इत्यस्य योगः 'पच्यते' क्रियया सह अस्ति । अतः 'उप' उपसर्गः अस्ति ।

3. निपातः → 'प्राग्रीश्वरान्निपाताः।' प्रादयः द्रव्यभिन्नार्थे ('च' अपि) निपातसंज्ञकाः सन्ति । 'चादयोऽसत्वे।'
यथा- 'प्रची', अत्र 'प्र' गतिसंज्ञकः उपसर्गसंज्ञकश्च अस्ति
'लोध्रं नयन्ति पशु मन्यमानाः' अत्र 'पशु' शब्दः असत्वे (द्रव्यभिन्नार्थे) अस्ति । तात्पर्यम् पशुवाचकः (गवाश्वादयः) पशु शब्दः नास्ति । 'सम्यक्' अर्थे पशुशब्दः । अतएवात्र पशुशब्दः निपातसंज्ञकः अस्ति ।

'विं पश्य'- अस्मिन् उदाहरणे 'वि' सत्वार्थे खगस्य बोधकः । अतएव निपातसंज्ञकः नास्ति ।

4. विभाषा → 'न वेति विभाषा।'
निषेधस्य विकल्पस्य च 'विभाषा' संज्ञा भवति ।

29-04-2021

डॉ० निर्मल कुमार झा, स० प्राचार्य
राधा-उमाकान्त सं० महावि० सुखसेना, पूर्णियाँ
का० सि० द० सं० वि० वि० दरभङ्गा

29-04-21

अनिवार्यप्रथमपत्रम् ।  उपशास्त्री

संस्कृतानुवाद: →

संस्कृत- वाक्य में कर्ता के पुरुष, वचन के अनुसार विभिन्न लकारों में अलग-अलग रूप बनते हैं। परस्मैपदी क्रियाओं तथा आत्मनेपदी क्रियाओं का रूप भी अलग-अलग होता है। धातु के साथ परस्मैपदी क्रियाओं में निम्न प्रत्यय लगते हैं →

| पुरुष | एकवचन | द्विवचन | बहुवचन |
| --- | --- | --- | --- |
| प्रथम पुरुष → | तिप् | तस् | झि |
| मध्यम पुरुष → | सिप् | थस् | थ |
| उत्तम पुरुष → | मिप् | वस् | मस् |

धातु के साथ आत्मनेपदी क्रियाओं में निम्न प्रत्यय आते हैं →

| पुरुष | एकवचन | द्विवचन | बहुवचन |
| --- | --- | --- | --- |
| प्रथम पुरुष → | त | आताम् | झ |
| मध्यम पुरुष → | थास् | आथाम् | ध्वम् |
| उत्तम पुरुष → | इट् | वहिङ् | महिङ् |

ये प्रत्यय विभिन्न लकारों में पुरुष तथा वचन के आधार पर विभिन्न सूत्रों की सहायता से धातु के विभिन्न रूप बनाते हैं। यथा →

पठति, पठत:, पठन्ति (लट् प्रथमपुरुष, विभिन्न वचनों में क्रमश:)
अपठत्, अपठताम्, अपठन् (लङ्)
पठिष्यति, पठिष्यत:, पठिष्यन्ति (लृट्)
पठतु, पठताम्, पठन्तु (लोट्)
पठेत्, पठेताम्, पठेयु: (विधिलिङ्)

शेष अगली कक्षा में।

29-04-21
डॉ० निर्मल कुमार झा,
स० प्राचार्य
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

19-04-2021

अनिवार्यपत्रम् । साहित्यम् । व्याकरण के छात्र हेतु । शास्त्री II रघुवंशम् । सुरगिरा व्याख्येयम् ।

" तेषां महार्हासनसंस्थितानामुदारनेपथ्यभृतां स मध्ये ।
रराज धाम्ना रघुसूनुरेव कल्पद्रुमाणामिव पारिजातः ॥"

प्रस्तुतोऽयं श्लोकः महाकविकालिदासरचितस्य रघुवंशमहाकाव्यस्य षष्ठसर्गादुद्धृतः अस्ति ।

कविरत्र सिंहासनेषु समासीनां नृपाणां मध्ये समुपविष्टस्य अजस्य लोकोत्तरं सौन्दर्यं सविशेषं वर्णयति । तात्पर्यमस्ति यत् रघुपुत्रः अजः बहुमूल्यासनेषु अवस्थितेषु नृपाणां मध्ये तथैव शुशुभे यथा देवतरूणां मध्ये पारिजाततरुः शोभते ।

अन्वयः → महार्हासनसंस्थितानाम् उदारनेपथ्यभृतां तेषां कल्पद्रुमाणां मध्ये पारिजात इव स रघुसूनुः इव धाम्ना रराज ।

शब्दार्थः व्याकरणञ्च → महार्हासनसंस्थितानाम् → महत् च तत् अर्हम्, तत् च आसनम्, तस्मिन् च संस्थिताः, तेषाम् ।

उदारनेपथ्यभृताम् → उदारं नेपथ्यं बिभ्रति इति उदारनेपथ्यभृतः, तेषाम् (श्रेष्ठवेषधारिणाम्) । कल्पद्रुमाणाम् → देववृक्षाणाम्

पारिजातः → पारम् अस्य अस्ति इति पारी (समुद्रः) तस्मात् जातः (कल्पवृक्षाणां मध्ये श्रेष्ठतमः एतन्नामकः वृक्षः ।) । धाम्ना → ध्या + मनिन् - धामन् (तेजसा) । रराज → शुशुभे ।

अस्मिन् श्लोके वैदर्भी रीतिः । माधुर्यगुणः । उपमालङ्कारः । उपजाति छन्दश्च ।

19-04-2021

डॉ० निर्मल कुमार झा,
(सहायक प्राचार्य)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

29-04-2021

शास्त्री III

(साहित्य प्रतिष्ठा) मालविकाग्निमित्रम्। श्लोकव्याख्या।

अष्टमपत्रम्

"मन्दोऽप्ययमन्दतामेति संसर्गेण विपश्चितः।
पङ्कच्छिदः फलस्येव निकषेणाविलं पयः॥"

महाकविकालिदासरचितस्य मालविकाग्निमित्रनाटकस्य द्वितीयाङ्कात् उद्धृतोऽयं श्लोकः।
यथा नाटकाचार्यं गणदासस्योक्तिः।

अन्वयः → पङ्कच्छिदः फलस्य निकषेण आविलं पयः इव विपश्चितः संसर्गेण मन्दः अपि अमन्दताम् एति।

शब्दार्थः व्याकरणञ्च → पङ्कच्छिदः = कर्दमनाशकस्य जलप्रसादनोपयोगिनः कतकनाम्नो प्रख्यातस्य।
फलस्य। निकषेण = संयोगेन। आविलम् = कलुषमपि।
पयः इव = जलसदृशः। विपश्चितः = विशेषज्ञस्य, पण्डितस्य
संसर्गेण = निरन्तर सहवासेन। मन्दः = मूर्खः। जनः = लोकः। अमन्दताम् = नैपुण्यम्। एति = प्राप्नोति।
पङ्कच्छिदः = पङ्के छिनत्ति, तस्य।
अमन्दताम् = न मन्दः, तस्य भावः, ताम्।

अलङ्कारः → अप्रस्तुतप्रशंसा उपमा च अतः सङ्करः।

छन्दः → पथ्यावक्त्रम्। लक्षणम् →
"युजोश्चतुर्थतो जेन पथ्यावक्त्रं निगद्यते।"

[signature] 29-04-21

डॉ० निर्मल कुमार झा, सह प्राचार्यः।
रा० उ० सं० महावि० सुरवसेना, पूर्णियाँ।